॥ ॐ॥

श्री गौडपादाचार्यकृतम्

श्री विद्यारत्नसूत्रम्

(श्री शंकरारण्यमुनिकृतदीपिकासहितम्)

प्रकाशकः

श्री पीताम्बरापीठ संस्कृत परिषद्

बनखण्डेश्वर, दतिया (म.प्र.)

।। ॐ ।।

श्री गौडपादाचार्यकृतम्

श्री विद्यारत्नसूत्रम्

(श्री शंकरारण्यमुनिकृतदीपिकासहितम्)

卐

प्रणेतारः

श्री स्वामिनः

सर्वतन्त्रस्वतन्त्राः निगमागमतन्त्रपारीणाः

परमहंसपरिव्राजकाचार्याः

श्री पीताम्बरापीठाधीश्वराः राष्ट्रगुरवः

卐

प्रकाशकः

श्री पीताम्बरापीठ संस्कृत परिषद्

बनखण्डेश्वर, दतिया (म.प्र.)

प्रकाशक:
श्री पीताम्बरा संस्कृत परिषद्,
श्री पीताम्बरापीठ,
बनखण्डेश्वर, दतिया (म.प्र.)

卐

प्रथम संस्करण : १००० प्रतियाँ
दीपावली : संवत् : २०३५
द्वितीय संस्करण : १००० प्रतियाँ
वासन्तिक नवरात्र २०६३
तदनुसार ३० मार्च, २००६ गुरुवार

卐

मूल्य : ३०-००

卐

मुद्रक :
शिवशक्ति प्रेस प्रा० लि०
ग्वालियर रोड, झाँसी (उ०प्र०)
फोन : २४४१०९२

प्रकाशकीयम्

श्रीत्रिपुरासिद्धान्तः समभावेन गुरुदेवात्मनामभेदं प्रतिपादयति। इदमेव पूर्णाद्वैतं शाक्तमद्वैतं च। सर्वाणि दर्शनानि किंचिन्न्यूनत्वं लभन्ते। इदं सर्वाङ्गपूर्णत्वाद्दर्शनमूर्धन्यता मावहतीति नाति तिरोहितं तद्विदामागममर्मज्ञानाम्। अस्मिन् कामेश्वरीकामेश्वरयोः स्वारसिकं सामरस्यतां प्राप्तं परतत्वमेव त्रिपुरसुन्दरीरूपेण विराजते। परब्रह्म चित्कला सांविदी कलादीनि अस्या एव नामान्तराणि। इयमेव सकलाधिष्ठानभूता सर्वानन्दमयी राजराजेश्वरी भगवती ललिताम्बिका कर्तुमकर्तुम- न्यथाकर्तुं समर्था। सर्वेषां वेदान्तानां तात्पर्यमत्रैवावसीयते। जगत्व्यापारसंपादनस्य सर्वाणि कार्याण्यत्रैव प्रतिष्ठितानि। अत्र न शिवस्य प्राधान्यं न शक्तेः अपितूभयोः साम्यम्। इयमेवपृथिव्यादि षट्त्रिंशत् तत्वग्राम-रूपिणी सती सर्वेभ्य अतीता। अतएव तत्वातीतेति ध्यायते योगिभिः। अस्याः स्वरूपं जगद्व्यापि तथापि जगतः पृथक् विद्यते। अतएवेयं विश्वोत्तीर्णा। पराशक्तिरूपेणस्य तत्वस्यैव व्यवहारः। तदुक्तं कामकला विलासे 'स्फुट शिवशक्ति समागमरूपिणी पराशक्तिः' चिद्विलासे च "सामरस्य वपुरिष्यतेपरा"। इयमेव आब्रह्मकीट जननी विद्यते। इदं परिदृश्यमानं सर्वं प्रपञ्चमस्या उन्मेष मात्रम्। चराचरात्मके

द्विविधे जगन्निर्माणे एषैव प्रभवति। तदुक्तं श्रीस्वामिपादैः मुण्डकोपनिषद् ऊर्णनाभिरिति मन्त्रस्य भाष्ये "शक्ति पदार्थोपि द्विविधः जडश्चेतनश्च जडानां कारणं जडः चेतनानां चेतनः खद्योतवद्गीयमेकस्मिन् संभवात्। चेतनः ज्ञानात्मकः जडः क्रियात्मकः उभाभ्यां मिलिताभ्यां सृष्टिकार्यमिति विवेकः।"

निर्गुणापि सा सगुणत्वं विभर्ति। ललितासहस्रनाम्नि "व्यक्ताव्यक्तस्वरूपिणीति" तस्या उभयात्मकं समर्थितम्। श्री स्वामिपादैरपि मुण्डकोपनिषदः यस्मिन्द्यौरिति मन्त्रस्य भाष्ये "सच्चिदानन्दात्मकस्य शक्तितत्वस्य सगुणेव्यक्तिर्हिमोपलवत् तस्यामवस्थायामेवसाधकाः दिव्यलीलाभावं मन्यन्ते। वस्तुत उभयोर्भेदो नास्ति। तथापि पराशक्त्या व्यक्ताव्यक्त स्वरूपत्वात् तदन्तःपात्येव सगुणः तथापि अमायिकत्वं तस्याभ्युपेतव्यम्। सच्चिदानन्दरूपत्वात् यथा हिमोपलः कदाचिज्जलरूपेण विलीयते तत्र व्यक्तेरव्यक्तपूर्वकत्वमधिगतमिति।"

श्रीपराशक्तिरना मारूपरहिता अव्यपदेश्या स्वसेवकवृन्दे वत्सलासती कथं सगुणरूपं धारयति अयमेवास्य ग्रन्थस्य प्रधान विषयः। वस्तुतः आगमशास्त्रं साधनाप्रधानं क्रियात्मकं तस्य स्वरूपमतएव तन्त्रसाहित्ये साधनग्रन्थानां बाहुल्यं दार्शनिकग्रन्थानां संख्यात्वल्पीयस्येव। अत्र दर्शनमपि साध नस्योपकारि वर्तते। यथा अन्य दर्शनेषु साधनस्यादर्शनं विद्यते तथा नात्र इदं श्री विद्यारत्नसूत्रं सक्रियं त्रिपुरसिद्धान्तं निरूपयति।

ग्रन्थस्यादौ शिष्यान् शिष्टाचारं शिक्षयन् भाष्यकारेण

मंगलाचरणं विहितम्। पुनश्चोपद्घाते भगवती दृश्यमानमा ब्रह्मकीटपर्यन्तं जगन्निर्माय स्वयमेव स्वप्रभाभास्वरं सुधासागर मध्यस्थितं मणिद्वीपमरीरचत्। तत्रस्थिते। चिन्तामणिमन्दिरे आत्मानमात्मना चित्कलारूपेणावतस्थौ। तदग्रे शाक्तमन्त्रा-गमस्य जिज्ञासोचिता नवेति विस्तरेण प्रतिपाद्यते। मन्त्रस्य लक्षणं सम्यक् विचार्य्य तस्य ऋषि-बीज, छन्दः, कीलकादीनां विस्तृतं विवरणं तेषामुपयोगिता च प्रदर्शिता। तदन्ते 'न्यास' शब्दस्यार्थं निरूप्य तस्यावश्यकर्तव्यताङ्गीकृता। द्वितीयसूत्र स्यावतारणायां "सर्वं खल्विदं ब्रह्मे" ति श्रुत्वा ब्रह्मातिरिक्तं सर्वमसम्भवमेव तत्र शक्तेस्तदागमस्य च कल्पनाया अनवकाश इति पूर्वपक्षः। उत्तरपक्षे त्वात्मनः अखण्डाकारत्वं निरुच्य जीवपरमात्मनो अल्पज्ञत्वं सर्वज्ञत्वं चोक्तम्। चिच्छक्तिः ब्रह्मणः स्वरूपभूता तस्याः शक्तित्वं किंविधमिति विचारः तस्याः ब्रह्मणाऽभेद सिद्धान्तश्च निरूपितः। निर्गुणब्रह्मस्वरूपिणी चिच्छक्तिः श्रीविद्यैव अनामेति कथनम्। तस्या एव तत्त्व त्रयेणानेकविधत्वं प्रतिपाद्य तत्त्वशब्दस्य विचारपूर्वकमर्थनिरूपणं तदग्रे रक्तशुक्लमिश्राणां चरणत्रयाणां वर्णनं कृत्वा शक्तेः बीजस्वरूपत्वमङ्गीकृतम्। ईश्वरमन्त्रगुरुशब्दानामर्थ निरूपणपुरःसरं तेषां पारस्परिकोऽभेद इति च प्रतिपादितं तदन्ते चक्रलक्षणमपि। तत्त्वत्रयवशात्सा शक्तिः शाम्भवी, श्यामा विद्येति त्रैविध्यं प्राप्तवती। तिसृणां शक्तीनां परमशिव सदाशिव रुद्रा एव पतयः। तासु विद्यैव श्रीत्रिपुरसुन्दरी, सैव चिन्तामणि ग्रहस्वामिनी, तयैव भण्डासुरसंहारः कृत इति

कथा-रूपेण व्यपदिष्टम् विद्याया:। पूर्वे श्यामा तथा चोत्तरे शाम्भवी संस्थिता। ताभ्यामनेक विद्यानामाविर्भाव:। ता: विद्या: श्रीविद्याया: परिवारभूता:। तत्र श्यामाया विद्याया: पूर्व दक्षिणाम्नायोपदिष्टा चिन्तामणिगृहस्य पूर्व-दक्षिणद्वाराधिकारिण्य: विद्या: सम्प्रसूता: ता: सर्वा कामराजेनोपदिष्टा:। एवमेव पश्चिमोत्तराम्नायौ शाम्भव्या निष्पन्नौ। इत्थं चतुराम्नाय विद्यानां याथातथ्येन समस्तं निरूपणं कृतम्। महाविद्याया ऊर्ध्वाकारेणावस्थिति: तत्रैव ऊर्ध्वाम्नायं समुपवर्ण्य चिन्तामणि गृहस्थिता सुन्दरीति व्यपदेश्या इयमेवानुत्तरेति षष्ठ अनुत्तराम्यायोऽपि संकेतित:। तत्रैव वैन्दव-चक्रस्यावस्थिति:। भक्ताननुगृह्णन् भण्डासुर- वधार्थ एकैवानेकरूपधारिणी सा तस्या मन्त्रतन्त्राणां बहुविधत्वं तत्प्रयोज्य फलभेदश्च समुपवर्णित:। तदग्रे श्रीचक्रस्य स्वरूपं प्रदर्शितम्।

अग्रे सर्वाम्नायेषु समुपवर्णितानां देवतानां मन्त्रयन्त्रणोद्वारा:। इत्थमस्मिन् ग्रन्थे श्रीविद्याया: साङ्गोपाङ्गं तात्विकं स्वरूपं प्रदर्शितम्। अत्र संकेतितानां सर्वासां देवतानां साधकोपयोगि प्रयोगात्मकं निरूपणं परिषद: प्रकाशिते सप्तविंशति रहस्य नामके ग्रन्थे विद्यते। ऋष्यादीनां प्रायोगिकं स्वरूपं कुत्र? कुत्र चासां देवतानां ध्यानन्यासादय: इति प्रश्ने समुपरिस्थतेऽस्माभि: प्रकाशतोऽयमेव ग्रन्थ: साधकाननुगृह्णन् क्रमपूर्वकं सर्वमुपदिशति। एष त्रिपुरासिद्धमानवाख्य ओघत्रय-मण्डलत्रयशक्तित्रयादीनामन्ते रक्तशुक्लचरणानां ध्यानं भ्रूमध्ये मिश्रचरणानां ध्यानं च

हृदयस्थितानाहते चक्रे तदग्रे च निर्वाणशक्तिस्वरूपिण्या: भगवत्या: त्रिपुरसुन्दर्या: ध्यान सहस्रदलकमले भवति इत्यलम्।

इमानि सूत्राणि पूज्यभगवत्पादानामाद्य शंकराचार्याणां परमगुरुभि: श्रीगौडपादै: त्रिपुरागममुद्दिश्य विरचितानि एतेषामन्यतमा कृति: श्रीविद्याया: सुन्दरं स्तोत्रं सुभगोदय नामक समुपलभ्यते। अति प्रसिद्धान्येतानि सूत्राणि भास्करादिभि: आगमशास्त्रमर्मज्ञरुदाहरणरूपेण प्रस्तुतानि। भाष्यकार: उपनिषदां टीककर्तु: श्रीविद्यारण्यस्य शिष्य: शंङ्करारण्य:।

एकविंशति-सूत्रपर्यन्तं भाष्यं विधायोक्तं "इतस्तत: सूत्राणां तात्पर्यं स्पष्टम्। अतएव न व्याख्यातम्।" इति कथयित्वा भाष्य विरराम। इदं ग्रन्थरत्नं प्रकाश्य परिषद् परमामोदमनु भवति। अस्य सर्वोप व्ययीभार: श्री रामनारायण वैद्यै: सहर्षमङ्गीकृत:। श्री मोतीलालशास्त्रिणा मुद्रणार्हा प्रतिलिपि: कृता।

द्वावपि परिषद: पार्षदी शिष्टाचारानुरोधेन धन्यवादार्हौ। मुद्राणप्रबन्धक: श्री कैलाशनाथोऽपि धन्यवादार्ह: येन महता प्रयत्नेन संशोध्य मुद्रितम्। आशासे अनेन ग्रन्थेन श्रीविद्यातत्त्वं विज्ञाय साधका: स्वाभीष्टं प्राप्नुवन्तु।

बृजनन्दन शास्त्री साहित्यचार्य:
मंत्री
श्री पीताम्बरापीठ संस्कृत परिषद्
दतिया (म.प्र.)

दीपमालिका
संवत् २०३५



परमहंस श्री पीताम्बरापीठाधीश्वर राष्ट्रगुरु परमपूज्य
श्री १००८ श्री स्वामी जी महाराज, बनखण्डेश्वर, दतिया

॥ ॐ॥

श्री गौडपादाचार्य कृतम्

श्री विद्यारत्नसूत्रम्

(श्री शंकरारण्यमुनिकृतदीपिकासहितम्)

卐 दीपिका 卐

बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम्।
पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे॥
गुरुं गणपतिं दुर्गां बटुकं शिवमच्युतम्।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं बन्दे विभूतये॥
श्री विद्यारत्नसूत्राणां वाक्यार्थप्रतिपादने।
भवगत्याः प्रसादेन क्रियते दीपिका मया॥

सा भगवती जगत् सृष्ट्वेदं तस्मिन् देवादीनुत्पाद्य तेषामनुग्रहाय स्वभक्तानां पुरुषार्थाय भण्डासुरहरणायापि च या ब्रह्मणः स्वप्रकाशाचित् देवीरूपेणाऽभिव्यक्तास्तेषां ज्ञानैश्वर्य-

बलवीर्यतेजोभिः सदा सम्पन्नत्वमिति यावत्। तस्य तारतम्ये नादौ विश्वकर्मणा दुग्धोदधिमध्यस्थित मणिद्वीपस्थं चतुर्विंशतिव प्रशिष्टिं चिन्तामणिमन्दिरं कल्पयित्वा ततस्तत्र चित्प्रकाशामेव तां देवीं प्रतिष्ठाप्य पश्चादनेकशक्तयः पुरोवर्तिन्यः स्थितास्ता आम्नायत्वसंज्ञया तन्मन्दिरस्य ऋग्वेदादिमय चतुर्द्वारे वक्ष्यमाणे स्थापिताश्च नियमिताः।

ततो देवा वक्ष्यमाण्मन्त्रपारम्पर्यदेशिकरूपेण तत्त्वत्रय सम्बन्धत्वावच्छिन्नावच्देदकरूपेण परापारम्पर्यमिति, कामराज-पारम्पर्यमिति, लोपामुद्रापारम्पर्यमिति च तत्तत्संज्ञाभिश्च तत्त न्नामभिश्चाऽभिव्यक्ताः सन्तस्यदीयमन्त्रयन्त्रतन्त्राणि भगवत्याः नागसङ्ख्याक्रमेण देताभिः पूज्यतया तत्प्रसादमनुसृत्य स्थिताः तदीयशास्त्रप्रकटनार्थं तदुपासकानां ज्ञात्वाऽनुष्ठानतया पुरुषार्थाय च भगवता गौडपादाचार्येण तद्रहस्यं सर्वं मन्त्ररत्नसूत्रैः सूत्रितम्--

अथ शाक्तमन्त्रागमजिज्ञासा॥१॥

ससूत्रार्थो वर्ण्यते मया प्रसादेन तस्याः-

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥

इति. सूत्रलक्षणं वेदान्तसम्बन्धाऽभिधेयवदस्य। अथ वेदादिकर्मकृतधर्मं सम्पाद्य अनन्तरं वा, साधनचतुष्टय सम्पत्तय-

नन्तरं वा? न द्वितीयः। ब्रह्मजिज्ञासा कर्तव्या 'अथाऽतो-ब्रह्मजिज्ञासा' (वे. १।१।१) इति सूत्रेण चरितार्थात्वात्। तस्मात् साधनसम्पत्त्यनन्तरमिति न युक्तम्। किन्तु धर्मजिज्ञासो-त्तरध र्मसम्पदानानन्तरमिति अथ शब्दस्यार्थः।

अथार्थित्वसामथर्यविद्वत्तां सम्पाद्याऽनन्तरमित्यङ्गीकारे 'अथाऽतो धर्मजिज्ञासा' (जै.सू.1।1।1) इति सहस्राधिकरणीय-पूर्वमीमांसा शास्त्रेण चरितार्थत्वात् तदत्राऽसङ्गतम्।

सिद्धान्तस्तु यद्यपि साधनचतुष्टयसम्पत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्या तथापि प्रबल प्रारब्धतया प्रतिबन्धक निवृत्तिद्वारा शाक्तमन्त्राणामागमस्य च जिज्ञासा। लोके तावद्वैष्णव-शैवप्रभृतिमन्त्राः प्रवर्त्तन्ते शाक्तमन्त्राणामागमस्य च जिज्ञास्य तथैव किं प्रयोजनम्? सत्यम्। शक्तिसम्बन्धावच्छिन्नतया सर्वस्य शाक्तत्वात् 'सर्वं शक्तिमयं जगत्' इति प्रसिद्धत्वात्। तस्मात् सर्वेषां मन्त्राणां तदन्तःपातित्वं युक्तम्।

मकारं मननं प्राहुस्त्रकारस्त्राणमुच्यते।
मननत्राणसंयुक्तो मन्त्रइत्यभिधीयते।।

इति केषांचित् पक्षः।

मकारो जीव संज्ञः स्यात् त्रकारस्त्वात्मसंज्ञकः।
जीवात्मसंज्ञयोरैक्यं मन्त्र इत्यभिधीयते।।
मकारं मानसं प्रोक्तं त्रकारं बुद्धिलक्षणम्।
बुद्धिमानस संयोगो मन्त्र इत्यन्मिधीयते।

मन्त्रस्य किंवा लक्षणम् ? मन्त्रभ्यासाप्रतियोगित्वम्।

ऋषिश्छन्दश्च बीजं च कीलकं शक्तिरेव च।
अङ्गन्यासस्ततो ध्यानं मन्त्राङ्गानां च सप्तकम्।।
ऋकारः सृष्टिसंज्ञः स्यात् षिकारः स्थितिसंज्ञकः।
सृष्टिस्थितिभ्यां संज्ञेयं मन्त्रविद्भिरुदाहृतम्।।
छकारः पदसंज्ञः स्यात् दकारश्चाऽभिलाषक+।
पदाभिलाषसंज्ञं तच्छन्दः सद्भिरुदाहृतम्।।

इति त्रिपुरासिद्धान्ते।

बीजं कारणमर्थानां जगन्निर्माणरूपकम्।

इति सुन्दरी तापनीये। सर्वकारणमित्यर्थः।

ननु अनेकेषां मन्त्राणां मध्ये वाग्भवकामराजतार्तीयमित्यादीनां तेषा बीजसंज्ञत्वात् सर्वकारणत्वं कथम्? सत्यम् मुख्यत्त्वगौणत्वाभिप्रायेण। तत्राप्यस्तु नामबीजत्वावच्छिन्न-बीजस्य। 'शक्तिःसा बलमुच्यते' इति सुन्दरीतापनीये।

वीर्यं तेजो बलं क्षात्रं सर्वं तच्छक्तिरुच्यते।

इति त्रिपुरासिद्धान्ते।

तस्माद्रथाङ्गनेमीतिकीलकं तच्च कीलकम्।

इति प्रासादोपनिषद् उपसंहारवाक्ये। नीयते सम्यगनेनेतिन्यासः।

त्वङ्गमज्जारक्तसंयुक्तं शरीरमपवित्रकम्।

न्यासेनानेन शुद्ध्यर्थमजस्रं न्यासमाचरेत्॥

इति लक्ष्मीरत्नकोशे।

अजस्रं नाम उदयाद्यस्तमानपर्यन्तं वा नित्यं कदाचिदपि वां आद्यपक्षश्चेत् देवताध्यानादि कृत्यस्य कालो न विद्यते। द्वितीये न्यासमात्रेणाऽलं वा, पूर्वोक्तमत्राङ्गसप्तकविशिष्ट मन्त्रोपासना कर्तव्या वा? सत्यम्। नित्यं कदाचिदपीत्यनेन देवताध्यानादिकृत्यस्यकालो विद्यते, नित्यं न्यासमात्रेणाऽचरितार्थत्वात् एतावता पूर्वोक्तमन्त्राङ्गसप्तक विशिष्ट मन्त्रो पासनैव कर्तव्या।

नन्वेकदिनसम्बन्धित्वावच्छिन्नन्यासेन पावित्र्यप्रयोज कत्वादजस्रं न्यासेन किं प्रयोजनम्? सत्यम्। "प्रातरधीयानो रात्रिकृतं पापं नाशयति, सायमधीयानो दिवसकृतं पापं नाशयति" 'यह्नात् कुरुते पापं तदह्नात् प्रतिमुच्यते' इत्युक्तत्वादज्ञान सम्बन्धित्वावच्छिन्नविशिष्टतया चाङ्गन्यासेन परिशुद्धं दूरीकृत-दुरितस्यादावश्यकत्वादतो नित्यमेवाऽवश्यं न्यासः कर्त्तव्यः। तस्मान्मन्त्राङ्गसप्तक विशिष्टमन्त्रोपासनैव कर्त्तव्येत्युक्तम्। आगमशब्दस्याऽनेकत्वं मन्त्राणामनेकत्वमित्यर्थः।

ननु "सर्वं खल्विदं ब्रह्म" इति श्रुत्या ब्रह्माऽतिरिक्तं किमपि नास्तीति वेदान्ते निरुक्तम् तस्मादेकस्मिन् ब्रह्मणि मन्त्राणामने कत्वं कथम्? सत्यम्। एकस्य ब्रह्माणो या स्वरूपभूता चित् जगन्निर्माणशक्तिरूपेणैका यदाऽनेकरूपेणोत्पन्ना, तदीयसम्बन्ध

त्वा वच्छिन्नमन्त्राश्चोत्पन्ना:। एतेन ब्रह्मण: का हानि:। ब्रह्मणश्चिन्मायावशात् पञ्चभूतात्मकं यथा जगदुत्पन्नं तद्वदत्राऽपि ज्ञातुमिच्छा जिज्ञासा।

ननु मन्त्राणामनेकत्वस्य ज्ञातुमिच्छयैवाऽलम्। उपासनाया वैयर्थ्यात्। सत्यम्। ज्ञातुमिष्टतयाऽव्यवहितक्षणाऽवच्छिन्नेन ज्ञात्वाऽनुष्ठानेनोपास्योपासकभावत्वाऽवच्छिन्नेन मन्त्र सिद्धि:, तद्द्वारा तदधिष्ठानदेवताया अनुग्रहार्थंत्वान्न तस्या विरोध:॥१॥

नन्वेकस्मिन् ब्रह्मणि शक्तित्वं कथम्? 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते' इति न्यायात्तस्या: प्रयोजनं किम्? अवाप्त सकलकामत्वात।

किञ्च एकैव चित्प्रकाश शक्ति: केनोपायेनाऽनेकविधा इति शङ्कायाम्-सत्यम्, "आत्मैवाऽखण्डाकार:" इत्यादि सूत्रै: सिंहाऽवलोकनन्यायेन परिहरति:-

आत्मैवाऽखण्डाकार:॥२॥

'आत्मा वाऽरेदृष्टव्य: श्रोतव्यो मन्तव्यो निदिध्यासितव्य:' इति। आत्मैवाऽखण्डाकार इत्यत्र जीवात्मनोऽखण्डाकारत्वं वा परमात्मनो वेति विषय:। दृष्टत्वश्रोतृत्वादिकत्वं जीवात्मनो युक्तं, न तु परमात्मन:, तस्य निर्विशेषत्वात् 'अस्थूलमनणु' इत्यादि

श्रुते:। कथमखण्डाकारत्वं जीवस्येति चेत् 'घटमहं जानामि' 'पटमहं जानामि इत्यादि सर्वदृष्टतया। तस्मात् सर्वनियन्ता जीव इति पूर्वपक्ष:।

सिद्धान्तस्तु दृष्टत्वश्रोतृत्वादिकं परमात्मन एव कथम्। अन्त:करणावच्छिन्नस्य प्रादेशिकस्य स्वर्गनरकादि सञ्चारिणो जीवस्य दृष्टत्वादिकमयुक्तम्।

'घटमहं जानामि' इत्यनेन चिदाभासस्य यत्किञ्चिद्दृष्ट त्वादिकं वर्त्तते, न तु सर्वपदार्थविभासकत्वम् 'किं जानामि' इत्येतावताऽखण्डाकारत्वमप्रसिद्धम्। खण्डाकारत्वं प्रसिद्धम्। इत्यखण्डाकारत्वं परमात्मनो युक्तम्।

नन्वखण्डाकार इत्याकारवत्त्वं परमात्मनो न युक्तम्, तस्याऽसङ्गोदासीनत्वात्। यत्राऽऽकारवत्त्वं तत्र परिच्छिन्नत्व मनित्यत्वं च दुर्वारं स्यात्। इत्यत अखण्डत्वमेवाकार: अखण्डाकार:।

नैतावता सोपाधिकत्वमेवाकारत्वं किन्तु निरुपाधित्वमेव। 'अदष्टंदृष्टरश्रुतं श्रोत्रम्' इत्यादि श्रुते:। तस्मादखण्डाकारत्वं परमात्मन एव।

ननु भवन्मते परमात्मातिरिक्तया नहि वस्त्वन्तरमत्रोक्तम्, स्वर्गनरकादिसञ्चारिणो जीवात्मनो दृप्टत्वा दिकमयुक्तम्, परमात्मनस्तु युक्तमेवेत्येतेनाऽद्वैतहानिरिति चेन्न। 'तत्सृष्ट्वा

तदेवाऽनुप्राविशत्' इति परमात्मनो जीवरूपेण प्रविष्टत्वात् एवं चेत्रर्हि जीवात्मनोऽप्यखण्डाकारत्वं युक्तम्। सत्यम्। जीवात्मनस्त्वखण्डाकारत्वं भ्रान्तितयाव्यहृतंजीवहृतजीवत्व विचारे यथा भ्रान्तिस्तद्वत्। तत्सृष्ट्वेत्यात्मन एव जीवत्वात् कथं भ्रान्तिरिति चेन्न। जीवत्वस्याऽनित्यत्वमेव वेदान्ते प्रसिद्धत्वात्तत्रैव विचारणीय प्रकृते किमायातमित्यत आह–

चैतन्यस्वरूपा चिच्छक्तिः ॥३॥

चैतन्यस्य ब्रह्मणः स्वरूपा चित्शक्तिः सामर्थ्यम्। सैषाऽऽनन्दस्य मीमांसा भवति। आनन्दस्य ब्राह्मणः स्वरूपा चित् मीमांसा तेजोमयस्वरूपत्वेन विचारिता भवतीति वाक्यस्याऽभिप्रायः।

अत्र सैषा चित्शक्तित्वेन प्रकारतया विचारिता वा, चिच्छक्तित्वेन विचारिता वा?, न तावत् द्वितीयः पक्षः। चिदेव शक्तित्वेन विचारिता चेत्, शक्तित्वं नाम सर्वज्ञत्वम्, सर्वकारणकर्तृत्वम्। चिदः निर्विकारावयवत्वादसङ्गोदासीनत्वात् किञ्च यत्र तेजस्त्वं तत्र शक्तित्वं, अनेन स्वरूपत्वमुक्तम्। चिदः स्वरूपत्वाभावात्। तस्मात् सैषा चित्शक्तित्वेन प्रकारान्तरत्र–तया विचारितेति वक्तव्यमिति पूर्वपक्षः।

किमुत्पाद्योत्पादकत्वेन प्रकारान्तरतया वक्तव्यं वा परिणामित्वेन वा? न तावदाद्यः पक्षः। लोके तावत् साऽवयवानां सत्त्वपरिच्छिन्नपदार्थानां तत्त्वम्। निरवयवस्य चैतन्यस्य नोत्पादकत्वं वक्तव्यम्। परिणामित्वं च तदैव क्षीरस्य दध्यात्मना परिणामित्वेनाऽनित्यत्वम्। यथा मायाप्रतिबिम्बत्वमीश्वरत्वम् तथा बिम्बप्रतिबिम्बपक्षमपि वक्तव्यम्। तस्मात् शैवपुराणेषु वेदेषु च चिदेव शक्तरिति गीयते।

ननु चैतन्यस्य स्वरूपेत्यत्र चैतन्यस्य षष्ठ्या भेदत्वं प्रतीयते। सत्यम्। चन्द्रिका चन्द्रयोर्यविद्धेस्तथैव स्वमायायाश्चैतन्यस्य निर्विशेषब्रह्मणश्च भेदत्व तदवश्यमिति चेन्न। दृष्टान्तेऽपि चन्द्रं विनाचन्द्रिकाभावात् शिष्यस्य बोधनार्थ चैतन्यस्य स्वरूपेत्युक्तम्। वस्तुत्वेन ब्रह्मचैतन्यस्य स्वरूपायाः नित्यायाः परप्रकाश- रहिताया अभेदत्वात्। 'नित्योनित्यानाम्' इति श्रुतेः। न तस्य शक्तिरित्यभेदत्वेन न संदेहः।।3।।

किं प्रकृते इत्यत आह :-

सैवेयमनामाख्या श्रीविद्या।।४।।

सा तेजःपुञ्जाकृतिः शक्तिरेवाऽनामाख्या श्रीविद्या। 'इयमेव सा या प्रथम व्यौच्छदन्तरस्यां चरति प्रविष्टा'। अस्याऽयमर्थः। या इयमेव चित् सा अनामाख्या प्रथमा विद्या व्यौच्छत स्वच्छा निर्मला। एतावता माया तत्कार्यसम्बन्धा- रहिता अन्तरस्यां

प्रविष्टा सती चरति। अन्तरस्यां, अन्तरस्मिन् इत्यनेन स्थूलशरीरविशिष्टलिङ्गशरीरेषु चिदाकाशे वा न द्वितीयः। चिदाकाशस्यान्तरत्वाभावात्। 'आत्मन आकाशः सम्भूतः' इत्यादिश्रुत्या पञ्चभूतात्मकस्य प्रपञ्चस्याधारत्वात् प्रपञ्चमूलत्वात् चिदाकाशस्यान्तरस्मिंश्चरतीत्युक्तम्। लिङ्ग- शरीरेषु तदयुक्तम्, लिङ्गशरीरेष्वित्यनेन प्रादेशिकत्व सम्भवत्वात्

किञ्च तथैवोक्तं चेज्जीवस्य यथा नित्यत्वं तद्वदस्य चिदाकाशस्य प्रपञ्चमूलत्वादन्तरत्वं न वक्तव्यमिति भवद्भिर्यदुक्तं-तदप्यसङ्गतम्। प्रपञ्चमूलत्वात् स्वान्तरत्वात्। एतावतै-वाऽनामाख्यविद्यायाः अपरिच्छिन्नत्वं सर्वकारणत्वमुक्तम्।

अनेन पश्चात् किमायातमित्यत आह :-

तत्वत्रयेण सा विविधा॥५॥

तत्वत्रयेण सा विविधा तत्वमाविर्भवति। तत्वत्रयेण शस्त्रेण सा विद्या छेदिता विविधा वा तत्वत्रयसम्बन्धत्वावच्छिन्न- त्वेन विविधा वा? न तावद् द्वितीयः पक्षः। 'पराऽस्य शक्तिर्विविधैव श्रूयते'। अस्य ब्रह्मणः या अनामाख्या परा शक्तिः विविधा तत्वत्रयेण छेदिता या तत्वत्रय सम्बन्धत्वा- वछिन्नत्वेन विविधेति नानाविधत्वमुक्तम्, तदा तत्त्वत्रयेणेत्यत्र वैयर्थ्यं स्यात्। तथैव हन्तैवं भवन्मनीषा किल। एकस्यां विद्यायां छेद्यत्वं,

छेदकत्वं छेदनत्वमपि च विपर्ययमेतद्वक्तव्यं वा तन्न भवति।

न तस्य कार्यं करणं च विद्यते
न तत्समश्चाऽभ्यधिकश्च दृश्यते।
पराऽस्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च॥

इत्यादिश्रुत्या नानाविधत्वमुक्तम्, आविर्भवतीत्यनेन स्वतन्त्रत्वमुक्तम्। भवन्मतरीत्या तु पारतन्त्र्यं, तदङ्गीकारे जीवत्वमत्राप्यङ्गकर्तव्यमिति वक्तव्यम्। एवं तस्यां वा तस्मादाविर्भूतत्वं अनाम्नोऽपि भवताऽङ्गीकर्तव्यम्। तद्वद् ब्रह्म तस्य भावस्तत्त्वं ब्रह्मैव तत्त्वमित्यर्थः। तस्य त्रयं आत्मविद्या-शिवमिति ओघत्रयत्वावच्छिन्नपरावासना विशिष्ट परापारम्पर्य-गुरूणां यदधिष्ठानं सदनं तत्वं चरणमित्यात्मशब्देन गीयते तदेवात्मतत्त्वं तत्त्वाधिष्ठानबीजं तार्त्तीयमित्यर्थः।

उक्तमवच्छिन्नलोपामुद्राचरणमिति शिवशब्देन गीयते। तदेव शिवतत्त्वं तत्त्वाधिष्ठानबीजं मन्मथमिति। उक्तमवच्छिन्न-कामराजविद्या वासनाविशिष्टकामराजविद्यापारम्पर्यगुरूणां यन्मन्दिरं तत्कामराजविद्याचरणमिति विद्याशब्देन गीयते। तदेव विद्यातत्त्वं तत्तत्वाधिष्ठानबीजं वाग्भवमिति। तस्मादेव तत्त्वत्रयं मन्त्रत्वावच्छिन्नमन्त्राणां देवतानां च सर्वकारणम्।

किञ्च -

परावागात्मतत्त्वं च शिवतत्त्वं च मध्यमा।
विद्यातत्त्वं च पश्यन्ती ध्वनयस्तत्त्वलक्षणम्।।

इति तापनीये।

एतावता तदेव तत्त्वत्रयं परेति मध्यमेति पश्यन्तोत्युक्तम्। 'वैखरीसामुदायिका' इति तापनीये। ताः यजुषा सम्पादिताः। 'चत्वारिवाक्परिमिता पदानि

तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहितानेङ्गयन्ति

तुरीयं वाचो मनुष्या वदन्ति'।। इति स्पष्टार्थः। यच्च तेजोमयं तदेव चरणत्रयमिति।

ननु परावासनादीनां देशिकादीनां यत्सदनादिकं तदेव चरणत्रयं तदेव तत्त्वत्रयमपि यच्चेत्युक्तम्। तदधिष्ठानसदन-त्रयत्वस्य चरणत्रयत्वं कथम्? सत्यम्।

अवस्थानं तु सदनं चरणं मन्दिरं गृहम्।
तत्त्वं स्थानं भवं तेजः पञ्जरं च स्थितिस्त्रियाम्।।

इति विश्वाख्ये।

तस्माच्चरणसदनयोर्भेदाऽभावात् चरणमेव सदनं तत्त्वमपि तदेव।

ननु चरणस्य तेजस्त्वात् सदनस्य पृथिवीत्वादुभयोर्विरोध:। सत्यम्। तेषां सदनस्य तेजोमयत्वात् न तु प्राणिनां सदनानीव

भवन्ति।

एवं तत्त्वत्रयेण चिदिति तेजोमयेन सदनत्रयेण चरणत्रयेण तत्त्वत्रयेण भेदात् त्रिविधेति किल सैव विद्यते। पूर्वसूत्रेणोक्ता सा विद्याऽनामाख्या तेजःपुञ्जाकृतिः। चित्तेजोमयचरणतत्त्वत्रये कथं नानाविधकर्तृत्वं, कारणत्वाभावात्। सत्यम् यथा निर्विशेष-ब्रह्मणश्चक्षुराद्यर्थविलासाभावेऽपि स्वयं स्वमाययाजगत्सर्गकाले स्वयमसङ्गोदासीनः सन्नपि स्वसन्निधिमात्रेण जडायाः मायायाः यादृशाधिकारत्वं दृश्यादिकारणत्वं तावदत्राऽपि परावासनादि बोध कदेशिकादीनां तस्य सन्निधिमात्रेणाऽनामाख्याया देवताया- स्तेजः पुञ्जाकृतेश्चिदश्चाऽपि उभयोश्चलनात्मकत्वेन क्रियासंसर्ग-वशादत्र तेज एकं सत्।

अथ तेजः पुञ्जाकृतिं सम्यग् धृत्वा परिच्छिन्नरूपेण लोकानुग्रहायाऽऽविर्भवन्ती सती देवतानामभिरनेकविधान- ध्यानादौ त्रिविधेति रहस्यम्।

तस्मात्तत्त्वत्रयत्वमेव त्रिगुणत्वं तदेव त्रिमूर्त्यात्मकत्वं त्रिबीजत्व त्रिपीठत्व त्रिखण्डत्व त्रिग्रन्थित्वेपि तदेव तत्त्वं कारणं तस्मात् परं नास्ति। 'यस्मात् परं नाऽपरमस्ति किञ्चित्' इति श्रुतेः।

ननु सदनत्रयस्य तेजसश्च अनामाख्याया देवतायास्तेजः पुञ्जाकृतेश्चिदश्चाऽपि क्रियासंसर्गवशादैक्यमित्युक्तम्,

परावा-सनादि देशिकानामधिष्ठानत्वं न स्यात्, तेजोमयसदनत्वेन तस्य तेजसः प्रकारान्तरेण परिणामित्वादिति चेन्न।

सद्यस्तस्यार्धमाकृतौ संसर्गवशादैक्यं स्यात्। अवशेषमर्धं सदनरूपेण चरणरूपेण स्थितत्वात्, एवं चेत् कामराजविद्यायां चरणत्रयमिति, लोपामुद्रायां चरणचतुष्टयमिति, पराविद्यायां चरणपञ्चकमिति चाऽनेकत्वं कुतः प्राप्तम्? सदनत्रयमेव चरणत्रयमिति तत्वत्रयमित्युक्तत्वात्। सत्यम्। प्रधानचरणान्याधारत्वेन तत्सम्बन्धवशादेतानि चरणान्याधेयतयोत्पन्नानि।

तथा चोक्तम् :-

चरणत्रयमेतेषामथोत्पन्नान्यनेकशः।
उत्पाद्योत्पादकत्वेन तत्त्वानि चरणत्रयम्॥

इति मंत्रोपनिषदि।

तस्मात्तच्चरणत्रयमेवोत्पाद्योत्पादकत्वेनाऽनेकविधानि। वस्तुत्वेनाऽभेद एव सम्बन्धः। तर्हि तेषां चरणत्रयशब्दतः सदनत्रयत्वं कुत्र? चिंतामणिमण्डपाच्छादितमये प्रासादे अनेकरत्नसङ्कीर्णमध्यशृङ्गे इति यावत्। शृङ्गस्य प्रासादत्वं कथम्? मन्त्राधिष्ठान देवताऽभिमतमन्त्राणां प्रासादस्य तदधिष्ठानदेवताऽभिमतमन्त्रत्वादिति चेन्न। अत्र लोकरूढया शृङ्गस्य प्रासादत्वमितिवत् यत्र प्रासादविद्याऽधिष्ठानदेवताभिमतमन्त्र इति वदन्ति।

तत्र मन्त्र एव तर्हि प्रासादो नाम। प्रासादशब्देनाऽत्र

चैतन्यं निर्विशेषब्रह्मेति यावत्। सेति प्रातिपदिकया शक्तित्वस्य प्रतिपादनात्तन्मायेत्युच्यते। 'सकारः सोमवर्णकः' इति तस्यैव शक्तिबीजत्वात्।

ननु बिन्दुद्वयविशिष्टस्य मनुस्वरयुक्तस्य सव्यञ्जनस्यैव शक्तिबीजत्वात् केवलप्रातिपदिकायाः शक्तिबीजत्वं न वक्तव्यमिति चेन्न। मुख्यत्वगौणत्वाऽभिप्रायेणाऽपि शक्तिबीजत्वस्य युक्तत्वात् सेत्यक्षरं पराबीजम्। तदेव शक्तिबीजकमिति। सेत्य- क्षरस्य शक्ति बीजत्वं स्यात्तर्ह्यनेकव्यञ्जनैर्विशिष्टस्य बीजस्य शक्तिबीजत्वं कथं स्यात्। तस्मात् सेति प्रातिपदिकमात्रस्य शक्तिबीजत्वमयुक्तम्। बिन्दुद्वयविशिष्टस्य मनुस्वरयुक्तस्य सव्यञ्जनस्य मुख्येन न? शक्तिबीजत्वमुक्तम्, येन प्रसिद्धं तस्य सव्यञ्जनत्वमिति मन्त्रव्याकरणे।

ननु सेति प्रातिपदिकया शक्तित्वस्य प्रतिपादनात् तन्मायेत्युच्यते इति भवतोक्तम्, बिन्दुसहितस्य चतुर्थस्वरविशिष्टस्य रेफयुक्तस्य च हकारस्य च मायाबीजत्वमित्युक्तत्वात् अत्र कथं तस्यौपचारिकतया मायात्वम्? तत्र केवलहकारस्य मायात्वमपि औपचारिकतया गौणमिति व्यञ्जकैर्विशिष्टस्य व्यञ्जनस्य मायात्वमौपचारिकतयाऽपि मुख्यमित्युक्तम्। तत्र किं 'हृल्लेखाख्यं शिवव्योमभुवनेशी गुहा स्त्रियाम्' इति विश्वाख्ये हकारस्यैतानि नामानीत्युक्तम्। तर्ह्येतस्मिन् शास्त्रे वाग्भवमिति, कामराजमिति, शक्तिवाराहमिति, श्री बीजमित्याद्येतेषां मायात्वं किं न स्यात्?

इति चेन्न। तत्तत्संज्ञाभिरेवोक्तत्वात्तत्राऽपि मायात्वमौपचारिकम्। तत्तत्संज्ञा:शृणु :-

श्रीमरिमेति कमला लक्ष्मीर्माता च मंगला।

इति श्रीबीजस्य नामानि।

कामराजः पुंसि मारो मदनं तु नपुंसकम्॥
कामश्च मन्मथः पुंसि कामेशी कालिकास्त्रियाम्॥

इति विश्वाख्ये कामराजबीजस्य नामानीत्युक्तम्।

कारणं शक्तिवाराहं स्त्रियां मदनविह्वला।

इति शक्तिवाराह नामानि।

वाग्भवं तु जगद्ययोनिः स्त्रियां वाणीमनोहरा।

इति विश्वाख्ये।

अनेन तत्तत्संज्ञा: कथिता: तस्मादेतेषु मायात्वमौपचारिक-मित्युक्तम्।

अस्तु नाम 'बीजत्वावच्छिन्नबीजानां मायात्वप्रतिपादनेन तावद्दोष: सर्वं मायेति गीयते' इत्युक्तत्वात्। अत्र प्रकरण प्रासाद इति हकारस्योपान्ते सकारस्यैव स्थितत्वात् शक्तित्व प्रतिपादनत्वेन मायात्वमुक्तम्। एतावता हशब्देनोक्तं ब्रह्म सकारेणोक्ता शक्तिर्या माया वर्त्तते। तस्यां प्रविष्टं सत् सर्वज्ञत्वादिगुणविशिष्टेश्वर इति

ततः प्रसिद्धः॥

सत्त्वगुणप्रधानमायाप्रतिबिम्ब ईश्वरः। तस्येश्वरस्येक्षणत्वं, न तु निर्विशेषब्रह्मणः॥

ननु सत्त्वगुणप्रधानमायाप्रतिबिम्बत्वं जीवस्याऽपीति चेन्न। अत्र प्रशब्दस्य प्राचुर्यमीश्वरे, न तु चिदाभासे जीवे, अविद्या प्रतिबिम्बत्वात्। तस्मादत्र हशब्देनेश्वर इत्यर्थः। प्रतिशब्देनोत्कृष्टार्थत्वादत्र प्रासादशब्देन निष्पन्नेश्वरशब्दे पर्यालोचनत्वेन ईश्वरत्वं प्रतिपादितम्।

ननु प्रासादस्यार्थ ईश्वर इत्युक्तम्, प्रासादस्य मन्त्रत्वं न स्यात् प्रासादस्यैवेश्वरत्वादिति चेन्न।

यथा घटश्च कलशः कुम्भश्चैकाऽर्थवाचकः।
तथा देवश्च मन्त्रश्च गुरुश्चैकार्थ उच्यते॥

इति सुन्दरी तापनीये।

तस्मादीश्वर एव मन्त्रः ईश्वर एव गुरुः स एव मन्त्राऽधिष्ठानदेवता, भेदाभावात्।

'ईश्वरो गुरुरात्मा' इतिवचनात्। तर्हि तया मन्त्रा अनेकाश्च, तथा यन्त्रतन्त्राणि, इत्युत्तरसूत्रे परावासनादिबोध- कादीनां स्व सामर्थ्येन मन्त्रा अनेका देवता भेदाभावात्। इत्युक्त्यादेवताभ्यो मन्त्राणां यन्त्राणां च भिन्नत्त्वमुच्यते। तस्मान्मन्त्राधिष्ठानदेवता

मन्त्राणां भेदत्वमयुक्तमिति चेन्न उक्तमाकरे-शिष्य-बोधनार्थं मन्त्राएव वस्तुत्वेन मन्त्राऽधिष्ठानदेवता देवतामन्त्रयोरभेदः। तथैव गुरुत्वे :-

गुकारः सदति प्रोक्तो रुकारो ज्ञानवाचकः।
सद्बोधानन्दसंज्ञोऽयं गुरुरित्यभिधीयते॥
गुकारस्त्वन्धकारः स्यात् रुकारस्तन्निवर्त्तकः।
अन्धकारनिवर्तित्वाद् गुरुरित्यभिधीयते।

इति वचनात् तथैव भेदः। यन्त्राणां तु तदभेदत्वात्। तर्ह्ययमभेदः मन्त्रौघयन्त्रौघयोर्वा तत्तद्यन्त्राणां वा? मन्त्रौघयन्त्रौ-घयोरभेदः न तावद्तत्तद्यन्त्राणां तत्कथमुच्यते? परादिदेशि-कादीनां यस्य तेजोमयसदनसम्बन्धस्य यत्तेजसः अकृतानेकीभावनां आकृतिं त्रिविधां कृत्वा ध्वन्यन्तरूपेणाऽऽविर्भूतत्वं जातम् तस्मात् सर्वासां देवतानां वक्ष्यमाणचक्रसङ्केतेन तद्बोधकादीनां चरणं सदन चक्रमिति, पुरमिति, गुहेत्यगारमिति च व्यवह्रियते।

तथा चोक्तम् :-

चक्रं पुरं च सदनमागारं च गुहा स्त्रियाम्।
इति विश्वाख्ये चक्रस्य पर्यायनामानि॥५॥

चक्रशब्दस्यार्थः कः इत्युत्तरमाह -

कोणपत्रसमुच्चयं चक्रम्॥६॥

केवलकोणसमुदायस्य वा न तु केवलपत्रसमुच्चयस्य वा चक्रत्वम्, पत्रसमूहस्य कमलमित्युक्तत्वात्। तर्हि मूलाधारचक्रमिति, स्वाधिष्ठानचक्रमिति चक्रसंज्ञया लोके कथं व्यवह्रियते? सत्यम्, औपचारिकत्वेन न तु मुख्यम्।

तत्राऽपि मूलाधारकमलं, स्वाऽधिष्ठानकमलमिति वक्तव्यम्। कोणसंज्ञाभावत्वात्। एतेन कोणपत्रसमुच्चयत्वं चक्रत्वमित्युक्तम् एतावता तत्तद्यन्त्राणामभेदः।

शिवमन्त्रयन्त्रयोस्त्वभेदः मन्त्राधिष्ठानदेवतामन्त्रयोस्तु तत्तद्यन्त्राणामिवाऽभेदः।

ननु तर्हि शुद्धविद्यादिपरान्तानां भेदो न स्यात्। मन्त्राऽधिष्ठानदेवतार्मन्त्रयोरिव तत्तद्यन्त्राणामिवाऽत्राऽप्युक्तमिति चेन्न। भण्डासुरवधार्थं देवतानामनुग्रहाय सा चिच्छक्तिरनेकविधाजातेति वक्ष्यमाणत्वात् अत्राऽपि न शङ्कनीयम्। प्रकृतमनुसरति :-

सा शाम्भवी विद्या श्यामा तत्त्वत्रयाकृतिस्त्रिविधा जाता॥७॥

शाम्भवी श्यामा विद्या तत्त्वत्रयेण या आकृतिस्तद्भेदात् त्रिविधा जाता। सा शाम्भवी विद्या श्यामेति नामरूपत्व युक्तम्। रूपत्वं नामोच्यते शाम्भवी शुक्लविद्या, श्यामा रक्तरूपा, विद्या श्यामरूपा कुतो हेतो:? सा च आकृतिं प्राप्ता त्रिविधा सत्यनन्तरं त्रिगुणात्मकस्य त्रिमूर्तेस्तेजसा सहिता संयोगत्वेन शाम्भवी विद्या श्यामेत्युक्तम्। शम्भुसम्बन्धेन तेजसा सहिता सती तत्रैका शाम्भवी, विष्णुसम्बन्धेन तेजसा सहिता सती तत्रैका श्यामा, ब्रह्मसम्बन्धेन तेजसा युक्ता तत्रैकाविद्या।

ननु विष्णुसम्बन्धेन तेजसा सहिता सती वैष्णवीति वक्तव्यम् यथा शम्भुसम्बन्धेन तेजसा सहिता सती शाम्भवीत्युक्तम्, तद्वदत्राऽपि। सत्यम्। विष्णुरेव स्वस्वरूपं विहाय रूपान्तर-मापन्नश्चेत्, तदा वैष्णवीति वक्तव्यम्, नैतावता स्वरूपनाश इति तात्पर्यार्थ:। किन्तु सर्वावयवयुक्तशक्तेराविर्भावत्वम्, नत्वव-यवास्ते, येन तथा स्यात्। तस्माद्वैष्णवीति न वक्तव्यम्। शिववत्तर्हीयमपि शिवस्य समाना तथा न भवति शिव: सर्वावय-वयुक्तेन स्वस्वरूपं विहाय रूपान्तरं प्राप्तवानिति कुत्रचित् कदाचिदपि नास्ति। एवं चेत्तर्हि नवरात्रिकल्पे देवीमहिम्नि माहेश्वरीति तत्कथम्? तत्राऽप्येकदेशेन तेजसा माहेश्वरीत्वम्,

तु न सर्वावयवत्वेन।

अत्र शिव शब्देन परमशिव इति वा रुद्र इति वा न, परमशिवस्य निरवयवत्वात्। अत्र प्रकृते शिवशब्देन रुद्र इति वक्तव्यम्। रुद्र एव शम्भुः, शं सुखं भवतीति शम्भुः। तर्हि जीवस्य यादृक् सावयवत्वं तादृशसावयवत्त्वं शम्भोश्च सावयव-त्वस्य तुल्यत्वात्, सत्यम्। उभयोः समाने सावयवत्वेऽपि सर्वज्ञत्वकिञ्चिज्ज्ञत्वोपाधितया नित्याऽनित्यत्वेन तारतम्यमस्ति।

किञ्च ईश्वरः स्वतन्त्रः मायाप्रतिबिम्बवशात्। जीवस्तु तथा न, अविद्या प्रतिबिम्बवशात्। माया सत्त्वगुणप्रधाना। अविद्या मलिनसत्त्व प्रधाना। तस्मात् सर्वज्ञस्य रुद्रस्य तेजसैकदेशेन तत्र जाता माहेश्वरीति वक्तव्यम्। विष्णोस्तु तथा न। तस्य तेजसः सत्त्वगुणप्रधानत्वात्। तमोगुणप्रधानेन तेजसा, रुद्रस्याऽतितीव्रत्वात् एकदेशेन तेजसा सम्बन्धेन शाम्भवीत्वमुक्तम् तस्मादेतावता शम्भुतेजसा सम्बन्धेन शाम्भवीत्युक्तम्।

ननु विष्णोस्तर्हि तेजसा सम्बन्धेन सर्वावयवत्वाभावतया श्यामलेति तथेव ब्रह्मणस्तेजसा सम्बन्धेन विद्याऽपीति च भवतोक्तम्। तस्य नाम्ना रहितत्वेऽपि श्यामला विद्येति तेन नाम्ना कथं वक्तव्यम्। विधीयतामन्येन नाम्ना। सत्यम्। त्रिगुणात्मिका मूलप्रकृतिर्या तस्या गुणाधिस्थानवर्णान् गृहीत्वा शाम्भवीविद्या श्यामलेत्युक्तम्। तस्मादन्येन न वक्तव्यम्।

शाम्भवी शुक्लरूपा च श्रीविद्या रक्तरूपगा।
श्यामला श्यामरूपाख्या एताश्च गुणशक्तयः॥

ननु तर्हि शाम्भवी शुक्लरूपेत्युक्तं शुक्लमेव सत्यं तत्त्वमेव किल शाम्भव्याः, रुद्रत्वकथम्? सत्यम्। सत्त्वगुण प्रधानेऽपि रुद्रसम्बन्धेन तेजसा संयोगेन रौद्रं रुद्रत्वं च। तथैव श्यामा रजोगुण विशिष्टा सती विष्णुतेज़सा संयोगेन क्षात्रं श्यामत्वं च। विद्याऽपि तमोगुणविशिष्टा। एवं ब्रह्मसम्बन्धेन तेजसा संयोगेन रक्तत्वं ब्राह्मणत्वं च। तस्मान्नत्वेतावता दोषः।

एतासां पुरुषाः के? परशिव सदाशिव रुद्रा इति। नन्वेकस्मिन् ब्रह्मणि परशिवादि भेदत्वं क़थमुच्यते? सा ब्रह्मचित् स्वसामर्थ्यात्तेजोरूपमापन्ना सती नामरूपविशिष्टा सती च यदा त्रिविधा जाता, निर्विशेषं ब्रह्मापि स्वमायावशात् परशिव इति, सदाशिव इति, रुद्र इति, ब्रह्मेति, विष्णुरिति, पञ्चविधं जातम्।

निर्विशेषंब्रह्मयत्तत् स्वस्मिन्मायावशादपि।
ब्रह्माविष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः॥
मूर्त्तयः पञ्चतत्त्वाख्यं चिद्विलासाय संस्थितम्॥

इति त्रिपुरासिद्धान्ते।

तस्मात् परमशिवपत्नी परविद्या, सदाशिवपत्नी श्यामला, रुद्रपत्नी शाम्भवी। विद्यैवपरमशिव पत्नीति तत् कथम्? सत्यम्। तयोविद्ययोर्निरतिशयत्वात् सौन्दर्यातिशयेन विद्यात्वेन चाऽतिशयत्वात्

विद्याया: सौन्दर्यस्य निरतिशयत्वात् तस्यां सौन्दर्यातिशयत्वमुक्तम्। अनेन त्रिपुरसुन्दरीति सिद्धान्त:। परमशिव: कामेश्वर:। अनेन कामेश्वरस्य पाणिग्रहणतया तस्या: विद्याया: कामेश्वरीत्वमुक्तम्। तत: परादिदेशिकादिभिर्मन्त्रकल्पेऽनेन सैव राजराजेश्वरी, षोडशीत्युक्तम्। तत: परमशिव पत्नीत्वेन अतिशयत्वाच्चिन्तामणिगृहस्याऽधिकारित्वादधिपतित्वम्। तत्र चिन्तामणिगृहं कथमुच्यते? भण्डाऽसुरस्योपाधिना देवा विचारवन्तस्तत: परमशिवानुज्ञया विश्वकर्माणमवलोक्य, हे विश्व-कर्मन् ! तव स्वाऽधिकारान्मणिद्वीपमिति पर्वतं च तन्मध्ये चतु-र्विंशति वप्रविशिष्टं चिन्तामणिसदनं प्रकल्पितव्य' मित्युक्तवन्त:। ततो विश्वकर्मणा निर्मितं दुग्धोदधिमध्यस्थितमणिद्वीपं चतुर्विंशति वप्रविशिष्टं महापद्माटवी सहितं चिन्तामणिसदनमवलोक्य प्रमोदयुक्ता: सन्तस्तत्र चिरं वसन्तो निर्विशेषं ब्रह्म परमशिव-स्वरूपेण सत्यज्ञानानंदस्वरूपत्वेन ध्यानवन्तस्तत: परमशिवस्यानु-ग्रहतया या चित्तां त्रिविधरूपां देवतां प्रतिष्ठाप्य ततस्तासां देवतानां पत्यर्थं निर्विशेष: परमात्मा त्रिविध: सन् त्रिविधां तां उद्वाहं कृतवान्। ततो देवा: परमशिवस्याऽनुग्रहेण परावासनादि-देशिकरूपेण सिद्धौघमानवौघदिव्यौघवक्ष्यमाणदेवतानां तत्रा-ऽधिष्ठानमन्त्रांश्च पूजार्हतया तच्चक्राणि च कल्पयित्वा मन्त्र-पारम्पर्यगुरुरूपेण स्थिता:। ततश्चाष्टौ वसव: स्वाधिकारेण सर्वेषां चक्राणामावरणदेवता: कल्पयित्वा पूजापारम्पर्यगुरुरूपेण स्थिता: तत: सूर्यसोमाग्नय: पीठत्रयरूपेण पीठाधिष्ठानरूपेण

गुरुत्रयरूपेण बटुकत्रयरूपेण मण्डलत्रयरूपेण च जाताः। ततो मुनयो नवसिद्धरूपेण वीरदशकरूपेण चतुःषष्टिरूपेण चाऽऽविर्भूताः। ततश्चतुर्दशमनवः शिवाद्यशेषगुरुपारम्पर्यक्रमेण सर्वेषां सर्वासां पूजकाः अर्हत्त्वेन स्थिताः। ततो गौर्यादयो नवमुद्रात्वेन नवदूतीरूपेण च तदधिष्ठानचक्रनवकरूपेण स्थिताः। ततश्च परितोऽष्टभैरवरूपेण स्थिताः।

तस्मादियं कथा मणिद्वीपे दुग्धोदधि मध्ये चिन्तामणि सदन समीपे सर्वायत्रैवेयं कथा तत्रैव चिन्तामणिसदनमित्युक्तम्। तस्मात् परमशिवश्च सदाशिवश्च तासां पतय इत्युक्तम्। एतासां मध्ये विष्णोर्ब्रह्मणोऽपतित्वं वेति चेन्न। परादिशुद्धविद्यान्तानां वक्ष्यमाणानां मध्येकाः प्रति विष्णोश्च ब्रह्मणश्च पतित्व प्रतियोगि भावत्वमस्तीति वक्ष्यमाणत्वात्।।7।।

प्रकृते किमायातमित्यत आह–

विद्यायाः पूर्वोत्तराभ्यामनेक विद्या जाताः।।८।।

'पूर्वोत्तराभ्यां विद्याया अनेकाः परिकल्पिताः' इति सुन्दरीतापनीये।

विद्यायाः राजराजेश्वार्याः षोडश्याः पूर्वोत्तराभ्यां शाम्भवी–श्यामलाभ्यामनेकाः जाता इति शाम्भवीश्यामलाभ्यामित्युक्ते घटपटादयो जाताः अनेकदेवता वा? न तावद् द्वितीयः पक्षः।

अनेकदेवता जाता इत्यत्र यदि देवता जाता इत्युक्तं, देवतानामनित्यत्वप्रसङ्ग। तस्माद्घटादय एव तदयुक्तम्। अनेका जाता इति देवतानामाविर्भवत्वं निधाय चेतसि जातश्चौपचारिकतया प्रयुक्त इत्युक्तं, तस्मान्न तावद्दोष:। ननु विद्यया अनेका जाता इति कथं नोक्तम्? सत्यम्। 'याम्यदिशिस्थिता: सौभाग्यादया: स्वस्या उद्भवा:' इत्युत्तरत्र सूत्रे वक्ष्यमाणत्वात् अत्र न शङ्कनीयम्॥8॥

प्रकृते किमायातमित्यत आह–

ता विद्या: परिवारा इति॥९॥

विद्याया: पूर्वोत्तराभ्यां शाम्भवीश्यामलाभ्यामनेका देवता जाता:। एतेन ता: विद्यापरिवारा: विद्याया: परिवारा: महाविद्याया: परिवारा:। ननु शाम्भवीश्यामलाभ्यां यदुद्भवा: ता: विद्याया: परिवारा इत्युक्तम्। एवं न, यया उद्भवत्वं तस्या: परिवारत्वम्, अनेन विरोधाभावात्। सत्यम्। परमशिवपत्नीत्वेन विद्याया अतिशयितत्वात् सर्वकारणत्वाच्च सर्वासां देवतानामधिष्ठानं त्वनयोक्तत्वादत्र न शङ्कनीयम्॥9॥

प्रकृति किमित्यत आह–

श्यामाया: पूर्वस्मिन् स्थिता:॥१०॥

पूर्वद्वारे पूर्वाम्नायसंज्ञाया: ऋग्वेदाऽधिष्ठानरूपेण स्थिताया

विद्याया: प्रभुत्व सिध्यर्थं तर्हि विस्तरेण वक्तव्यम्-

शुद्धविद्येति बालेति द्वादशार्द्धा मतङ्गिनी।
प्रधानशक्तयस्त्वेता एतासां परिवारका:।
चतुर्विंशत्सहस्राख्यदेवता: परिवारका:।।

एता: श्यामलाया उद्भवा इत्युक्तम्। अशुद्धस्य निवृत्या अज्ञानस्य निवृत्या शुद्धविद्या। यद्वा शुद्धानन्देनोपास्यत्वेन शुद्धविद्या इत्युक्तम्। बाला लीलया सर्वत्र प्रवर्त्तत इति बाला। द्वादशार्द्धा आनन्दनाथेन पूज्यतय तस्या: द्वादशार्द्धा श्यामला। मतङ्गेनोपास्यत्वेन मतङ्गिनीत्युक्तम्। एतासामनुपरिवारा अनामाख्या:। एता: पूर्वद्वारे ऋग्वेदमयेऽधिकारिण्य इत्युक्तम्।।10।।

याम्यदिशि स्थिता: सौभाग्यादय: स्वस्या उद्भवा।।११।।

याम्यदिशि स्थिता: दक्षिणद्वारे यजुर्वेदमये स्थिता: सौभाग्यादय: स्वस्या: स्वाधिकाराया उद्भवा जाता:।

सौभाग्यविद्या बगला वाराही बटुकप्रिया।
या तिरस्करिणीत्येतास्तस्या देव्याश्च सेवका:।।
एतासां देवतानां च परिवारास्त्वनेकश:।
त्रिंशत्सहस्र संख्याका अनामाख्याप्रसेवका:।।

सुभगानन्दविद्यानन्दयोः पूज्यतया सौभाग्यविद्या। बन्धि नीलाकिनी सहितस्य गगनानन्दस्य पूज्यतया बगला बवयोरभेदत्वात् वगलेत्युक्तम्। वराहानन्दोपास्यत्वेन तस्याः वाराहीति। अनुद्वाहत्वेन बटुक इत्युच्यते। यद्वाऽत्र बटुकस्योपास्यत्वेन बटुकः तिरोधाने स्वसामर्थ्यतया तस्यास्तिरस्करिणीति कामेश्वरीकामेश्वरयोर्विवाहसमये यवनिकारूपेण इतराणामगोचरत्वाय स्थितत्वात् आवरणत्वेन जवनिकेत्युक्तम्। एताः यजुर्वेद मयदक्षिणद्वारेऽधिकारिण्य इत्युक्तम्।।11।।

तथाऽधः स्थिताः पश्चिमदिशि।।१२।।

अथ पश्चिमदिशि पश्चिमद्वारे याः स्थितास्तथा स्वस्या उद्भवा इत्यनुषङ्गः। अथ शब्दार्थः क इत्युच्यते-कामराजविद्या पारम्पर्यगुरुभिः पूर्वद्वारे दक्षिणद्वारे स्थितानां मुद्रिण्यादिविद्यया चोत्पन्नानां ऋग्यजुर्वेदयोर्द्वारयोः प्रतिष्ठा उक्तनामभिर्नामकरणं कृत्वा तदनन्तरमित्यथशब्दस्यार्थः। एतावता किमित्युक्तम् एताः कामराजविद्या पारम्पर्यगुरुभिः प्रतिष्ठिताः सर्वाः पूर्वद्वारे दक्षिणद्वारे स्थिता इयुत्क्तम्।

अस्मिन् सूत्रेऽथ शब्दो नियोजितः अनेनाऽथशब्देन वक्ष्यमाणपश्चिमोत्तरद्वारस्थानां विद्यायाः शाम्भव्याश्चोत्पान्नानां लोपामुद्रापारम्पर्यगुरुभिः प्रतिष्ठितत्वमङ्गीकर्त्तव्यम्।

अनेनाऽथशब्देनाऽप्यूर्ध्व मार्गस्यानां प्रासादशब्देनोक्त शृङ्गस्थानां शाम्भवीस्वरूपाणांवक्ष्यमाणानां परापारम्पर्य बौधकैः प्रतिष्ठितत्वमङ्गीकर्त्तव्यम्।

तथा चोक्तम्-

चिंतामणि गृहस्यैव पूर्वद्वारे तु काः स्थिताः।
तन्मन्दिरस्य याम्यां च द्वारेकाः शक्तयस्तथा।
बोधकैः कामराजाख्यैः एतास्ताः स्युः प्रतिष्ठिताः।

इति त्रिपुरासिद्धान्ते।

पश्चिमे चोत्तरे द्वारे शक्तयः काः स्थिताः सदा।
लोपामुद्राख्यगुरुभिस्त्वेतास्ताः स्युः प्रतिष्ठिताः॥
प्रासादस्थाः शक्तयः का वेदिकायां च काः स्थिताः।
परादिगुरुभिस्तासां नियतत्वं समुच्यते॥

इति सिद्धान्ते।

तस्मादथशब्दस्यायमभिप्रायः। अथ स्वस्या उत्पन्नायास्ताः पश्चिमद्वारेऽथर्वणे स्थिता इत्युक्तम्। ताः का इत्युच्यते-

लोपामुद्रा महेशानि ततश्च भुवनेश्वरी।
अन्नपूर्णेति विख्याता ततः कामकलेति च॥
एतास्ताः शक्तयस्तत्र सेवका गणनायकाः।

सहस्रत्रय संख्याकाऽनामाख्या परिसेविका:।

लोपामुद्राया अगस्त्यमहर्षि पत्न्या: प्रसन्नतया लोपामुद्रा विद्या। भुवनानन्देनोपास्यतया भुवनेश्वरीत्यर्थ: पूर्णतयाऽन्न-रूपेणाऽऽविर्भवत्वादन्नपूर्णा। कामेश्वरीकामेश्वरयो: कलाविलास एवं काम कला। एता: पश्चिमद्वारेऽधिकारिण्य:।

शाम्भव्या: परिवारा उत्तरस्मिन्॥१३॥

अस्यार्थ: शाम्भव्या: या देवता जाता उत्तराद्वारे सामवेदमये स्थिता:। ता: का:?

तुरीयाम्बा महार्द्धेति चाऽश्वारूढ़ा महेश्वरि।
मिश्राम्बा च महाविद्या पश्चाद्वाग्वादिनी प्रिये॥
एता जाताश्च शाम्भव्या उत्तरस्मिन् प्रतिष्ठिता:।
द्विसहस्रैरनामाख्यैर्युक्ता एताश्च शक्तय:॥

तुरीयानन्दनाथस्योपास्यत्वेन तुरीया। महानन्दस्यार्थ विचारे प्रसन्नतया महार्द्धेत्युक्तम्। नित्यं तुरङ्गपर्यवस्थितत्वेनाऽश्वारूढ़ा। मिश्रेशानन्दनाथस्योपास्यत्वेन मिश्रविद्या। यद्वा सर्वासु मिश्रत्वेनमिश्रविद्या। स्वभक्तानां वाचिवादरूपेण प्रसङ्गरूपेण स्थितत्वात् वाग्वादिनी। एतावता चासामान्यर्थानामभिरेवोक्तम्। चेद्दुक्तम्-

पार्वत्युवाच

देवदेव जगन्नाथ भक्तानुग्रहकारक।
शुद्धविद्या परान्तास्ता नाम्नां कथय मे विभो।।

ईश्वर उवाच

साधुसाधु महेशानि श्रृणु त्वं प्रवदाम्यहम्।
शुद्धानन्द उपास्यत्वाच्छुद्धविद्येति कथ्यते।।

शुद्धत्वाच्छुद्धविद्येति कथ्यते।।

शुद्धत्वाच्छुद्धविद्येति पशुपाश विमोचिनी।
आदौ शिष्यस्य हृदये संस्थाप्य शुद्धये च ताम्।।
बाला लीलाविशिष्टत्वाद्वलेति च सदाप्रिये।
अर्थेति धारया नित्यं युक्तस्य परमेश्वरि।।
द्विदशानन्दनाथस्य प्रसन्नत्वान्महेश्वरि।
द्वादशार्द्धेति विख्याता तस्या देव्याश्च सर्वदा।।
मतङ्गस्य प्रसन्नत्वान्मातङ्गीति वरानने।
सा श्यामला तु विद्याया मुद्रां वहति मुद्रिणी।।
ताः कामगिरिपीठस्थाः पूर्वाम्नायस्य देवताः।
सुभगानन्दनाथस्य प्रसन्नत्वान्महेश्वरि।।
सौभाग्यविद्या विख्याता तस्मिन्नर्थे न संशयः।
श्रीविद्यानन्दनाथस्य चोपास्यत्वान्महेश्वरि।।
सौभाग्यविद्या विख्याता तस्मिन्नर्थे न संशयः।

श्री विद्यानन्दनाथस्य चोपास्यत्वान्महेश्वरि।।
सौभाग्यायास्ततस्यतस्या: श्रीविद्येति हि गीयते।
बन्धिनीलाकिनीभ्यां तु सहितस्य महेश्वरि।।
गगनानन्दनाथस्य प्रसन्नत्वान्महेश्वरि।
विख्याता वगलेत्येतद्रहस्यमिति गीयते।।
अभेदत्वाच्च बलयोर्वगलेति प्रकीर्तिता।
वराहानन्दनाथस्य प्रसन्नत्वान्महेश्वरि।।
वाराहीति सुविख्याता वराहवदनेन च।
सर्वदा दण्डपाणित्वाद् वरानने।
बटुकश्चेति विख्यातो बटुरूपेण वा तत:।।
अभक्तानां च सर्वेषां तिरोधानादिकारिणी।।
श्री तिरस्करिणी प्रोक्ता श्रृणु सत्यंवरानने।।
ता: पूर्णगिरि पीठस्था दक्षिणाम्नायदेवता:।
लोपामुद्राप्रसन्नत्वाल्लोपामुद्रेति गीयते।।
भुवनानन्दनाथस्य प्रसन्नत्वान्महेश्वरि।
भुवनेशीति विख्याता भुवनेशीति गीयते।।
तन्मायया सर्वपूर्णमन्नं दत्तं महेश्वरि।
अन्नपूर्णेति विख्याता तेन पक्षेण कथ्यते।।
अन्नरूपेण या देवी त्वाविर्भवति सा प्रिये।
श्री पूर्णानन्दनाथस्येत्यन्नपूर्णेति गीयते।।
तस्य कामेश्वराख्यस्य कामेश्वर्याश्च पार्वति।
कलाख्यस्य विलासस्य ज्ञाता कामकलेति सा।।

जालन्ध्र पीठनिलयाः पश्चिमाम्नायदेवताः।
श्रीतुर्यानन्दनाथस्य प्रसन्नत्वाद्वारानने।।
तुर्या चेति च विख्याता तस्या देव्या निरन्तरम्।
महौघानन्दनाथस्य मन्त्रार्थे सुप्रसन्नता।।
महार्घेति प्रविख्याता तस्या देव्या निरन्तरम्।
तुरगेषु स्थिता काचनान्नश्वारूढेति गीयते।।
मिश्रेशान्दनाथस्य प्रसन्नत्वान्महेश्वरि।
मिश्रविद्येति विख्याता सर्वमिश्रतयाऽथवा।।
सर्वेषां च स्वभक्तानां वादरूपेण सर्वदा।
सिद्धत्वाद्वाचि वरदा प्राख्या वाग्वादिनीति च।।
ओड्यानपीठनिलया उत्तराम्नायदेवताः।
श्रीपरानन्दनाथस्य प्रसन्नत्वात् परेति सा।।
प्रासादरूपेणैवेयं सा परा शाम्भवी तथा।।

इत्यधः स्रोतः।

अथोर्ध्वस्रोतो निरूपणम्-

स्वयमूर्ध्वाऽऽकारेण।।१४।।

स्वयं स्वसामर्थ्यतयोर्ध्वरूपेण स्थितेति यावत्।

स्व सामर्थ्यतया जाता चोर्ध्वरूपेण शाम्भवी।
श्रृङ्गे तिष्ठति सा देवी तद्रूपेणाऽपि संस्थिता।।

इति सुन्दरीतापनीये।

अस्यार्थः- स्वसामर्थ्यतया शाम्भवी ऊर्ध्वरूपेण जाता सा देवी श्रृङ्गं प्रत्यूर्ध्वरूपेणाऽपि सैव स्थिता।

नन्वनेनैव शाम्भवी श्रृङ्गे स्थिता श्रृङ्गेरूपेणाऽपीति यदुक्तं, तदयुक्तम्। श्रृङ्गे स्थितेति वक्तव्यम्, न। श्रृङ्गरूपेणाऽपि तस्याः। श्रृङ्गस्य क्षणरूपत्वेन? पृथिवीत्वाज्जडत्वाच्च तदङ्गीकारे चिद्रूपिण्याः देवताया अपि, जडत्वापत्तेः, सत्यम् श्रृङ्गस्य हि जडत्वेन देवताया अपि जडत्वम्। तस्य तद्भावात्। तर्हि तदभावादित्युक्ते जडप्रागभावो वा, जडप्रध्वंसाभावो वा, जडाऽन्योन्याऽभावो वा, जडाऽत्यन्ताभावो वेति चेत्, न। हन्तैवं भवन्मनीषाकेवल नैयायिकानामेतद्विचारणीयम्। अत्र तदभावो नाम जडात्यन्तभाव इति तेजोमयत्वाद्यद्यपि जडत्वं न भवति तथाऽपि न दोषः। यथा एकैव चित्जीवरूपेण जगदाकारेण यथा तद्वदत्रापि। तस्माच्छृङ्गरूपेण श्रृङ्गाभाव स्वरूपेण सैव।

सा शाम्भवी परायाः सहचरितत्वेन पराशाम्भवीति तद्रूपेण तत्र स्थिता। सा शाम्भवी परेति पराप्रासाद इति, पराशाम्भवीति तस्याः सहचरितत्वेन त्रिविधा। तदुक्तम्-

पराविद्या महेशानि! पराप्रासाद इत्यपि।
तथैव शाम्भवी प्रोक्ता एतास्तस्याश्च सेवकाः॥
परिवाराः सहस्राख्यास्तासां ताः परिसेविकाः॥

तासामभिप्रायः पूर्वमेवोक्तः। 'स्मर्त्तव्याः पादुकाः पूर्वं चरणं तदनन्दतरम्' इति रहस्यम्। एतावता आम्नायपञ्चकमित्युक्तम्। आम्नायत्वं कथम्? आम्नायभाव प्रतियोगित्वमाम्नायत्व पूर्वदक्षिणपश्चिमोत्तरमयमधश्चोर्ध्वं चेति, तत्कथं पूर्वं द्वारमित्यर्थः? एवं प्रकारेण योजनीयम्। ऊर्ध्वे तद्द्वाराभावेऽपि श्रृङ्गे परिवारादि देवतानामवस्थानं योजनीयम्, 'स्वसामर्थ्यतया जाता चोर्ध्वरूपेण शाम्भवी' इति सुन्दरी तापनीयश्रुत्युक्तत्वात्।

ननु 'श्रुतिः स्त्री वेदआम्नाय' इत्याम्नायाशब्देन वेदाः प्रमाणम्। अत्र 'शुद्धविद्येति बालेति द्वादशार्द्धा मतङ्गिनी'-त्येतासामाम्नायत्वं कथमिति चेत्, न।

ऋक्पूर्वं दक्षिणं पश्चाद्यजुर्वेद इतीर्यते।
पश्चिमोऽथर्वणोवेदः कौबेरः सामवेदकः॥

इत्युक्तत्वात्। तथा चोक्तम्-

ऋचां प्राच महती दिगुच्यते दक्षिणामाहुर्यजुषां मनीषिणः।
अथर्वणामङ्गिरसां प्रतीची साम्नामुदीची महती दिगुच्यते॥

तस्माद्वेदमयाश्चतुर्द्वारा इत्युक्तम्। एतावता तासां शुद्धविद्यादीनां किमायातम्। शुद्धविद्यादयो वेदाऽधिष्ठानदेवताः इत्यायातम्। शुद्धविद्याबाला द्वादशार्द्धा मतङ्गिन्यो ऋग्वेदाऽधि-

ष्ठानदेवताः। तथैव सौभाग्यादयो यजुर्वेदाऽधिष्ठानदेवताः। लोपामुद्रादयोऽथर्वणवेदाऽधिष्ठानदेवताः। तुरीयाम्बादयः सामवेदाऽधिष्ठानदेवता इत्यर्थः। वेदस्य द्वारमयत्वाद्वेदाधिष्ठातृदेवता एव द्वाराधिष्ठातृदेवताः। अत्र ऋचां प्राची महती दिगुच्यते इति, श्रृचां प्राचीमहतीदिक्। द्वारे इति शेषः उच्यते इति नामैकदेशे नाम ग्रहणं भीमो भीमसेन इतिवत्। नन्वत्र श्रृचां प्राची महती दिगुच्यत इति दिक्शब्दस्य प्रथमान्तत्वाद्दिक्शब्दस्य दिशीति सप्तमीनिर्देशः कथमिति चेत्, न। दिगिति प्रथमान्तस्य षष्ठ्यन्त सप्तम्यन्तमङ्गीकृत्वात् मन्त्रव्याकरणसूत्रेण। किञ्च छान्दसत्वाद्वाक्यार्थविचारे तु दिक्शब्दस्य प्रथमान्ते दिशीति सप्तम्यन्तत्वमङ्गीकर्त्तव्यम्। अत्र ऋक्शब्देन ऋग्वेदश्च तदधि ष्ठानदेवताश्चोक्ताः। सत्यम्। अत्र यदि शुद्धिविद्यादयो वेदाऽ-ष्ठानदेवता वेदे वक्तव्याः। तथा न किल। किन्तु अग्निर्देवता वातोदेवता सूर्योदेवता चन्द्रमादेवता वसवोदेवता आदित्यादेवता विश्वेदेवादेवता मरुतोदेवता बृहस्पतिर्देवता इन्द्रोदेवता वरुणोदेवता इति श्रुत्युक्तत्वात्। किञ्च अग्निमावाह सोममावहेति श्रौतविषये। तथैव शुद्धाविद्यामावह बालामावहेति तथा न सम्भवति किल। तस्मादेतासां वेदाधिष्ठानत्वं कथम्? सत्यम् 'शुद्धविद्या च बाला च द्वादशार्द्धा मतङ्गिनी' इति या देवताः शुद्धविद्यादि परान्तास्ता अग्निदेवता इत्युच्यते। अत्राऽयं प्रयोगः- शुद्धविद्यादयो वेदोक्ताः अग्निदेवतादयो भवितुमर्हन्ति। 'ऋृचां प्राची महती दिगुच्यते' इति वाक्येन सूचितत्वात् 'गङ्गायां घोषः' इति वाक्यार्थवत्।

तस्मात्तथेति। तदुक्तम्- 'शुद्धविद्यादयो नित्या अग्निर्देवतादिनोच्येत' इति मन्त्रोपनिषदि।

किञ्च यथा ब्रह्मविष्णुरुद्रादयो नवरात्र प्रारम्भकल्पे देवीमहिम्नि ब्रह्माणी वैष्णवीति च रुद्राणीति च लोकानुग्रहाय नामान्तरेण रूपान्तरेण चोच्यन्ते, तद्वदत्राऽपि शुद्धविद्यादयो वेदे वऽग्निर्देवता इति नामान्तरेण रूपान्तरेण चोच्यन्ते, तस्मान्न तावद् दोष:।

नन्वग्निर्देवता वातोदेवता इति यजुषाऽप्युक्तत्वात्, शुद्धविद्यादि परान्ता: सर्वा यजुर्वेदाऽधिष्ठानदेवता इति वक्तव्यम् तदङ्गीकारे एक एव आम्नायस्तदा 'ऋचां प्राची महती दिगुच्यते' इत्यस्य वाक्यस्य वैयर्थ्यं स्यादितित् चेन्न। यजुर्वेदेऽग्निर्देवतेति देवता शब्देन ये देवा उक्तास्ते देवास्तथा ऋग्वेदे सामवेदेऽथर्वण वेदेऽपि चोक्ता: तस्मादाम्नाय चतुष्टयं वक्तव्यम्। भवत्वेमाम्नायपञ्चकमिति यदुक्तं तदसङ्गतम्। तस्य भानाभावादिति चेत्, न। 'भारत: पञ्चमो वेद:' इति प्रसिद्धत्वात्। किञ्च 'वेदा वा एतेऽनन्ता वै वेदा:' इति वेदानन्त्यस्योक्तत्वात्। तस्मादूर्ध्वाम्नायश्चाऽङ्गी कर्त्तव्य:।

नन्वनन्ता वै वेदा इति वेदस्यानन्तत्वेनाम्नायस्यानन्तत्वं तदङ्गीकारे चाऽधिष्ठानदेवतानामानन्त्यमङ्गीकर्त्तव्यम्। तदा अनन्ताम्नाय: को वा नेत्यत आह। तथैव तर्हि आम्नायपञ्चकं तथाकथं वक्तव्यम्। सत्यम्। चतुर्द्वारसंज्ञया द्वारप्रणेताधिकारिण

इति नियमत्वेन आम्नायदेवतानामानन्त्यं सिद्धमित्युक्तम्।

ननु तर्हि चतुर्द्वारे चतुष्टयं वक्तव्यम्। तथाऽप्यूर्ध्वाम्नायो न वक्तव्यः। ऊर्ध्वद्वाराभावादिति चेन्न। शाम्भव्याः प्रासादाऽधिष्ठानमुक्तत्वात्। ऊर्ध्वद्वारोर्ध्वाम्नायस्याऽभावत्वेऽपि श्रृङ्गेऽवसानत्वं पराविद्यानामङ्गीकर्त्तव्यम्।

स्वसामर्थ्यादियं जाता चोर्ध्वरूपेण शाम्भवी।
श्रृङ्गे तिष्ठति सा देवी तद्रूपेणाऽपि संस्थिता॥

इति सुन्दरी तापनीयश्रुतेरुक्तत्वात्, तस्मान्न दोषः। तर्हि तासां शुद्धविद्यादि परान्तानां पतित्वप्रयोगस्य भावत्वं नास्ति किमिति शङ्काप्राप्तौ, सत्यम्। पतित्वप्रतियोग्यभावोऽस्तीत्याह।

पतित्वाभाव प्रतियोगिभावत्वमस्तीत्याह–

लोपामुद्रा तु सौभाग्यमहाविद्या तु षोडशी।
दाराः परशिवस्येति ता एतास्तु वरानने॥
श्यामला शुद्धविद्या च अश्वारूढा वरप्रिये।
दाराः सदाशिवस्येति ज्ञातव्याः परमेश्वरि॥
महार्द्धा द्वादशार्द्धाऽपि वाराही वगला प्रिये।
तुरीया भुवनेशीति श्रीपरा शाम्भवी प्रिये॥
दारा रुद्रस्य ताश्चैव श्रृणु सत्यं न संशयः।
सा तिरस्करिणी लक्ष्मीमिश्रा कामकला प्रिये॥

विष्णोर्दारा इति ख्याता अन्नपूर्णा शिवस्य च।
वाग्वादिनी च बाला च पत्यौ ते ब्रह्मणः शिवे॥
वाराही च सुतस्तस्या बटुकाख्य इतीर्यते॥
नवदूती हसन्ती च नव सिद्धाश्च देवताः।
अनामाख्या अनेकाश्च सर्वेषां भोगदेवता॥

तस्मादेतावता विद्यायाः पञ्चाम्नाय देवताः परिवारा इत्युक्तम्। प्रकृतेकिमायातमित्यत आह-

अथ चिन्तामणिगृहस्थिता त्रिपुरसुन्दरी महाविद्याऽनुत्तरा॥१५॥

अथाम्नायपञ्कमुक्त्वा तदनन्तरं चिन्तामणि गृहस्थिता त्रिपुरासुन्दरी या वर्तते सैव महाविद्या त्रायाणां पुराणां त्रिषु लोकेषु तस्या देव्याः सौन्दर्येण समुदायः तस्मात्त्रिपुरसुन्दरी मुख्यार्थः। एवं तदर्थं मतान्तरैरन्यथा यद्यत्कल्पयेत्तन्त्रः। ग्रन्थान्तरैरादिनायिका परब्रह्म महिषी परमशिवपत्नीति निश्चितत्वात्

ननु त्रिपुरसुन्दरीत्येताः पूर्वाम्नायदेवता वाऽधराम्नायदेवता चोर्ध्वाम्नायदेवता वेत्युक्तं चेदाम्नायपञ्चकमुक्त्वा तदनन्तर मित्यत्रवैयर्थ्यं स्यादिति द्वितीय आम्नायोऽङ्गीकर्त्तव्यः। सत्यम्। आम्नायपञ्चकमित्युक्ते ऊर्ध्वाम्नायश्चाधराम्नायश्चाऽनुत्तरमित्येकं षट्कमित्युक्तेऽधराम्नायः पृथक् तथाऽनुत्तारे

आम्नायद्वयमङ्गीकर्त्तव्यम्। अनुत्तरमित्ति नाम्ना यत्त्वेकं, ऊर्ध्वाम्नायोऽधराम्नाय इति विवेचने षट्कं वक्तव्यम्। तस्मात्र तावद्दोष:।

नन्वेवंविधचिन्तामणिगृहस्थिता या सा त्रिपुरसुन्दरी ति सूत्रवाक्येनाऽलम्, महाविद्याऽनुत्तरा चेति पदद्वयमप्रयोजकमिति चेन्न। सौभाग्यविद्यातत्त्वमुक्तम्, तन्निरासार्थं माविद्येति वक्तव्यम्। महाविद्येत्यनेन विद्याया अतिशयत्वात्। तर्हि औपचारिकतया महाविद्यात्वं लोपामुद्राया: सौभाग्यविद्यायाश्चेति चैतन्निरासार्थमनुत्तरा चेति एतावता सौभाग्यविद्याया लोपामुद्रायाश्चाऽनुत्तरत्वं नास्ति। तत: परादीनामनुत्तरत्वमुक्तत्वान्महाविद्यात्वं तत्राऽप्यङ्गीकर्त्तव्यम्। परादीनां यद्यपि महाविद्यात्वमनुत्तरत्वमप्यस्ति तथाऽपि स्वयमूर्ध्वाकारेणेति सूत्रेण सा शाम्भवी परारूपेण पराप्रासादरूपेण पराशाम्भवीरूपेण श्रृङ्गस्थितेत्युक्तत्वात्। चिन्तामणि मन्दिरस्थले वेदिकोपरि सिंहासनमध्यचक्रे वैन्दवे आवासरहितत्वात्। किञ्च परमशिवं प्रति पत्नीत्वं परादीनामभावाच्च तथा न वक्तव्यम्।

ननु परमशिवं प्रति पत्नीत्वं सौभाग्यविद्याया: लोपामुद्रायाश्चोक्तम्, तयोरेकस्याश्चिन्तामणि गृहँ आवासोऽस्तीति चेन्न। याम्यदिशि स्थिता: सौभाग्यादय: स्वस्या उद्भवा इति सूत्रेण जन्यजनकभावस्योक्तत्वात्। तर्हि जन्यजनकभावयोर्वस्तुनो: परमशिवं प्रति पत्नीत्वं कथमित्युक्ते सर्वज्ञेनेश्वरेण ज्ञातव्यं

तदस्माभिर्न वक्तव्यम्।

प्रकृते किमित्यत आह–

भण्डासुरहननार्थमेकैवाऽनेका॥१६॥

भण्डासुरस्य हननार्थमुपाधिनिवृत्त्यथमक्रैव चिच्छक्तिरनेका शुद्धविद्यादिः। भण्डासुर इति कश्चिद्राक्षसस्तस्येश्वरस्योपासनतया तेन वरं गृहीत्वा ततो देवादिभिः पुरुषैर्न वधो भवतीति तस्मात् स तेन युद्धमुखे देवादीनां पलायनं कृत्वा स्वत्वेन सर्वाधिकारः सम्पादितः। ततश्चेश्वरं प्रति देवादिभिः अतः परं किं कार्यमिति तपः कृतम्। ततो देवादिषु प्रीत्या परमेश्वरः किं कार्यं मया कृतमिति विचार्य भण्डासुरस्य वधः स्त्रीभिरस्तु पुरुषैर्मास्त्विति ब्रह्मणा चित्प्रकाशं सङ्गृह्य तां चिच्छक्तिं कृत्वा देवादीनवलोक्य इतः परमनया भण्डासुरवध इत्यभयं दत्वा तां चिच्छक्तिं तेषां दत्तवान्। तस्माद्भण्डासुरवधार्थमेव सा चिच्छक्तिरनेकाकाराऽनेकविधा शुद्धविद्यादिपरान्त–

तया मन्त्रा अनेकाश्च तथा यन्त्र तन्त्राणि॥१७॥

येन येन कारणेन चिच्छक्तिरनेकविधा जाता तस्या चिच्छक्त्याः मन्त्राः पूर्वोक्तास्तथा यन्त्राणि तथैव तन्त्राणि तेषां प्राप्तानि॥17

विविधभक्तिर्विविधोपासनम्॥१८॥

परावासनादिभक्तैर्विविधैर्भेदैर्विविधोपासनं नानाविधैर्भक्तैर्भक्तिमद्भिरुपासनं नानाविधम्॥18॥

तस्मात् फलान्यनेकानि॥१९॥

यस्मात् नानाविधोपासना प्राप्ता, तस्मात् फलान्यैश्वर्यादीन्यनेकानि तत्तदधिकारतया॥19॥

ननु तर्हिं यन्त्रतन्त्राणीति सूत्रेण मन्त्राणां यन्त्राणामनेकानीति भवद्भिर्युदुक्तं तद्विस्तरेण वक्तव्यमिति- शिष्याऽभिप्रायं बुद्ध्वा वक्षयमाण सूत्रैर्यन्त्रस्यरूपमाह-

कगजदशारद्वय मन्वस्राष्टदल स्वरपत्रत्रिवृत्तभूबिम्ब संज्ञा कथितं श्री सदनम्॥२०॥

एतस्यमानं किमित्याकाङ्क्षायां श्रुतिरेवमानमिति श्रुति वाक्यान्युदाहृत्याह- ''स्वां पुरीमरीरचयत् स्वायंभुवा। ये शरीराण्यकल्पयन् ते ते देहं कल्पयन्तु'। परेत्याख्यामयी परेति 'पराशक्तिरिति'। श्रीविद्याभाष्ये एतेषामर्थः प्रपञ्चितः। सूत्रस्याऽभिप्रायमाह-कगज इति। कादिनव, टादिनव, पादिपञ्च,

याद्यष्टाविति सूर्यसिद्धान्ते वर्णसंज्ञाया कथनात्। यन्त्राणां च तद्यथा- ककारस्याद्यक्षरत्वात् क इति बिन्दु संज्ञा। गकारस्य त्र्यक्षरत्वात् ग इति त्रिकोण संज्ञा। जकारस्याष्टाक्षरत्वात् ज इत्यष्टार संज्ञा। शेषं स्पष्टम्।।20।।

मणिगणनवावरणं तस्य।।२१।।

चक्रस्य नवावरणमित्यर्थः इतस्ततः सूत्राणां तात्पर्यं स्पष्टम्। अतएव न व्याख्यातम्। सूत्राणि वक्तव्यानीत्युक्ते सूत्रकारैरुक्तानि तानि पठ्यन्ते।।21।।

स्वस्याजनित सौभाग्यायास्तदेतत्सदनम्।।22।।

स्वजत्वादेतत्पश्चिमादेः।।23।।

त्रयाणां त्रयाणामावरणान्येकम्।।24।।

अथठडतपत्रमनुस्वारधरणि
शुद्धविद्यासदनम्।।25।।

तदेव तत्र वसुद्वययुक्तमनुस्वरं
कुमारीसदनम्।।26।।

एतयोरावरणान्ताक्षरगणनं यलषहण-
दहपत्रधरणि द्वादशार्द्धासदनम्।।27।।

पथमजकोणस्वरजपत्रगणनाधरणि
श्यामासदनम्।।28।।

पुष्पिण्याः परिसर्जनमेतत्।।29।।

श्रीतिपुष्पिण्यादिवत्।।30।।

शारिकाशुकयोः।।31।।

एतासामावरणं सगणनम्।।32।।

जगद्रञ्ज्यादि सर्वासामेवम्।।33।।

कगतजकोणहपत्रधरणि नागाः स्वसदनम्।।34।।

तस्यावरणं सगणनम्।।35।।

समयविद्येश्वर्याः सदनं शुद्धविद्यावत्।।36।।

डततकोणाय नागनागदलस्यार धरणी
सौभाग्यायाः सन्निहितासदनम्।।37।।

अथ तस्याः पञ्चावरणम्।।38।।

कहपत्रहकोण स्वरपत्राधरणी
वार्ताली सदनम्।।39।।

कगजकोणज पत्रस्वरधरणी बटुकस्य ।।40।।

एवमतस्वरदला धहपत्रधरणितिररोधानस्य।।41।।

तथैतस्समयाया:।।42।।

गगनप्रभाषड्वसुकोणपत्रस्य धरणी

भुवनेशीसदनम्।।43।।

यषहकोणे स्वरदलहपत्रधरणि

सदनमन्नपूर्णाया:।।44।।

गगनगुणाधर्मा विम्बाविशिष्टकला भुवनेशी

गुहवत् समयााया:।।45।।

गगनवसुकोणद्वयपत्रस्वरधारणी तुर्या सदनम्।।46।।

खजकोणद्वयपत्रस्वरवसुपत्रयुगधरणी

महार्द्धाया।।47।।

द्वादशार्द्धासदनवत् स्वनायक्या:।।48।।

कलासदनवन्मिश्रविद्याया:।।49।।

वाग्वादिन्या: कुमारीवत्।।50।।

गगनप्रभा पञ्चकोणाऽथ वसुकला

पत्रभूरेखा: परागारम्।।51।।

तथैव प्रासादविशिष्टयोरुभयो:।।52।।

तुर्यासदनवच्छाम्भव्या:।।53।।

परासदनवत् समयाया:।।54।।

व्योमदहकर्ममंनुपत्रादहकोणा

हरिमुखसदनम्।।55।।

व्योमजलपत्रत्रिवृत्ताधरणी श्रीगुरो: सदनम्।।56।।

अकथादित्रिरेखाद्वितत्रिकोणमेव वा

श्रीगुरो: सदनम्।।57।।

अनुत्तरविद्यानां सर्वासां शुद्धविद्यावत्।।58।।

वार्ताल्या: पञ्चावरणम्।।59।।

बटुकस्य षट्।।60।।

तद्वतिरोधानस्य।।61।।

भुवनेशी सप्त।।62।।

षट् सन्निहिताया:।।63।।

कामेश्या: कलायास्त्रि:।।64।।

तुरीयाया: पञ्च।।65।।

षण्महार्द्धाया:।।66।।

परा प्रसादस्य च परावत्।।67।।

शाम्भवव्या: पञ्च।।68।।

मृगेश्यास्य षट्।।69।।

चतुर्भिरावरणैर्विशिष्टं बोधकस्य सदनम्।।70।।

अथ विद्या एक विंशद्वर्णविशिष्टा।।71।।

पञ्चदशवर्णविशिष्टा सौभाग्या।।72।।

तथैवपश्चिमाविद्या।।73।।

शतवर्णयुताश्यामा।।74।।

द्वाविंशदक्षरविशिष्टा पुष्पिणी।।75।।

द्विचत्वारिंशद्वर्णविशिष्टा शुकविद्या।।76।।

अष्टाविंशदक्षरविशिष्टा शारिकाविद्या।।77।।

पञ्चत्रिंशदक्षरविशिष्टाहसन्ती देवता।।78।।

अक्षरत्रयविशिष्टा शुद्धविद्या॥79॥

कुमारीवर्णत्रयविशिष्टा॥80॥

दर्शवर्णयुता द्वादशार्द्धा॥81॥

षट्त्रिंशद्वर्णसमुचिता सौभाग्य सन्निहिता॥82॥

अष्टाविंशद्वर्णसमुच्चयो महाहेरम्बस्य मनुः॥83॥

चतुर्विंशद्वर्णसमुच्चयो बटुकस्य मनुः॥84॥

अथाष्टोत्तरनवत्यक्षरसमुचिता कोलवदना॥85॥

षट्पञ्चाशदक्षरैर्विशिष्टा यवनिका॥86॥

एकवर्णविशिष्टा भुवनेशी॥87॥

अथवा सप्तविंशद्वर्णविशिष्टा॥88॥

ककारादि पञ्चदशाक्षरसमुचिता

कादिपञ्चदशी॥89॥

खण्डद्वययुता चतुर्थस्वरविशिष्टा कामकला॥90॥

एकाक्षरविशिष्टा मुख्या ॥91॥

त्रयोदशविशिष्टा तुर्यां॥92॥

नवशतवर्णविशिष्टामहार्द्धां॥93॥

द्वादशाक्षरविशिष्टाऽश्वारूढ़ा॥94॥

एकाक्षरविश्शिष्टा मिश्रविद्या॥95॥

त्रयोदशशवर्णविशिष्टा वाग्वादिनी॥96॥

एकवर्ण विशिष्टा परा॥97॥

पराप्रसादरूपिणीवर्णद्वययुता॥98॥

वर्णैकविशिष्टा तथैव प्रासादपरा॥99॥

अथ ह्रस्वदीर्घषट्कसमुच्चयंदशैक-
वर्णविशिष्टः पराशम्भुः॥100॥

अथ ह्रस्वाक्षरदीर्घपञ्चसमुचिता तथैव
संख्या पराशाम्भवी॥101॥

अनुत्तरसंकेतप्रधानविद्या सप्तदश
वर्णविशिष्टा॥102॥

अथैतासां परिवाराणामनुपरिवारा
असंख्याका:॥103॥

॥ एतानि सूत्राण्यस्माभिर्गौड़पादैरुक्तानि॥

इति श्रीमत्परमहंस परिव्राजकाचार्य श्रीमच्छङ्करभगवत्पादाचार्यपारम्पर्य शिष्य श्री विद्यारण्यमुनिकृतौ श्रीविद्यामन्त्ररत्नसूत्रभाष्यं समाप्तिमगमत्॥

श्री पीताम्बरा पीठ

दतिया(म.प्र.)